सप्तमः पाठः ७

# स्वागतं ते राजस्थाने

## ( विशेषण-विशेष्य, कारक-प्रकरणम् )

पालीनगरतः
१४.१०.२०१५, बुधवासरः

प्रियमित्र मृदुल !

स्नेहेन नमस्कारः । अत्र कुशलं तत्रास्तु । भवतः पत्रम् अद्यैव प्राप्तम् । ज्ञात्वा प्रसन्नता जाता यद् भवतः सपरिवारं भ्रमणार्थं राजस्थानम् आगमनस्य योजना अस्ति । भवान् राजस्थानस्य दर्शनीयस्थलानां विषये पृष्टवान् तद् विषये लिखामि । राजस्थानस्य **प्रत्येकस्मिन्** भागे दर्शनीयानि स्थलानि सन्ति किन्तु दीपोत्सवस्य अवकाशे मारवाडक्षेत्रस्य भ्रमणम् आनन्देन भवति । यतो हि अस्मिन् समये **अधिका उष्णता** न भवति ।



राजस्थानं वीराणां वीराङ्गनानां च भूमिः अस्ति । अत्र **विविधानि ऐतिहासिकस्थलानि** अस्मभ्यं गौरवशालीतिहासस्य परिचयं कारयन्ति ।

जैसलमेरुनगरे स्थितं सोनारदुर्गं स्वर्णमयीपीतपाषाणैः निर्मितम् **अद्भुतं दुर्गम्** अस्ति । **जनपदे अस्मिन्** सीमावर्ति तनोटमातुः मन्दिरं तु **सर्वेषां भारतीयानां** मनसि देशं प्रति गौरवभावमुत्पादयति । भारतीयैः साकं वैदेशिकाः अत्रागत्य पटवाप्रासादान्, थारमरुस्थलं, भादरियास्थाने स्थितं **बृहत्तमं पुस्तकालयं** रामदेवरास्थानं च प्रतिवर्षं पश्यन्ति । विश्वविख्यातम् आणविकपरीक्षणनगरं पोकरणस्य **समीपस्थं खेतोलाईस्थानमपि** जैसलमेरुजनपदे दर्शनीयमेव अस्ति ।

सूर्यनगरिरूपेण **प्रसिद्धं जोधपुरनगरमपि ऐतिहासिकं महत्वं** धारयति । मारवाडराज्यस्य राजधानीरूपेण प्रसिद्धेऽस्मिन् नगरे मेहरानगढदुर्गः, राजस्थानस्य ताजमहलरूपेण **प्रसिद्धं जसवन्तथडा** नामकं स्थानं, कायलानाकासारः, मण्डोरोद्यानं च **इत्यादीनि स्थलानि** सन्ति । वीरशिरोमणेः प्रतापस्य मातुलगृहं पालीनगरमेवास्ति । पालीजनपदे परशुराममहादेवस्य मन्दिरं, स्थापत्यदृष्ट्या **विश्वप्रसिद्धं रणकपुरजैनमन्दिरम्** अपि विद्यते । एवमुच्यते यत् अस्मिन् जैनमन्दिरे निर्मितानां स्तम्भानां गणनापि दुष्करं वर्तते ।

मारवाडतः अतिरिक्तं मेवाडक्षेत्रमपि भ्रमणार्थं गन्तुं शक्यते । उदयपुरनगरे दुर्गैः, स्तम्भैः, कासारैः च नवनिर्मितम् प्रतापगौरवकेन्द्रं विशेषरूपेण द्रष्टव्यमस्ति । अनेन सार्धं आबूपर्वतः, जयपुरक्षेत्रं, घानापक्षीविहारः, उत्कृष्टानि **विभिन्नमन्दिराणि** रणथम्भौरेत्यादीनि अभयारण्यानि च दर्शनीयानि सन्ति ।

एतेषां दर्शनादेव मनसि आनन्दः गौरवभावं च जायते ।

एवमेव विश्वस्य **प्राचीनतमा अरावलीपर्वतमाला** राजस्थानं द्विभागयोः विभक्तं करोति। **अत्रत्या विशिष्टा** लोकसंस्कृतिः सामाजिकरीतयः नृत्यानि च जनान् आकर्षयन्ति । वैदेशिकाः पर्यटकाः अपि गौरवशालिं राजस्थानं नमन्ति।

अतः भवान् अवश्यमेव राजस्थानम् आगच्छतु । भवान् यस्मिन् भागे भ्रमितुमिच्छति तस्य योजनाविषये शीघ्रमेव सूचयतु । परिवारे ज्येष्ठेभ्यः प्रणामाः निवेदयतु ।

भवतः आगमनस्य प्रतीक्षायाम्।

**भवतः मित्रम्**

**अजयः**

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| श्रेष्ठतमम् | सर्वोत्तमम् | सर्वश्रेष्ठ |
| जनपदेषु | जिलासु | जिलों में |
| चिरकालात् | दीर्घकालात् | लम्बे समय से |
| प्रासादम् | भवनम् | हवेली |
| कासारः | सरोवरः | झील |
| शिरोमणिः | प्रमुखः | प्रमुख |
| उत्कृष्टानि | विशिष्टानि | विशेष |
| द्रष्टव्यम् | दर्शनीयम् | देखने योग्य |

## अभ्यासः

### मौखिकप्रश्नाः

१. **उच्चारणं कुरुत–**

| | | | | |
|---|---|---|---|---|
| बृहत्तमम् | दृष्ट्या | अत्रत्याः | वीराङ्गनानाम् | सर्वेषाम् |
| वैदेशिकाः | शिरोमणिः | स्तम्भानाम् | स्थापत्यम् | उत्कृष्टानि |

२. **एकपदेन उत्तरत –**

(क) कस्मिन् समये मारवाडक्षेत्रस्य भ्रमणम् आनन्देन भवितुं शक्नोति ?

(ख) पुस्तकालयेषु बृहत्तमः पुस्तकालयः कुत्र स्थितः वर्तते ?

(ग) जोधपुरनगरे किं दुर्गम् ?

(घ) प्रतापस्य मातुलगृहं कुत्रास्ति ?

(ङ) के अपि गौरवशालिं राजस्थानं नमन्ति?

## लिखितप्रश्नाः

१. **एकपदेन उत्तरत –**

(क) विश्वस्य प्राचीनतमा पर्वतमाला का ?

(ख) दीपावलीसमये कस्मिन् क्षेत्रे भ्रमणम् आनन्ददायकम् ?

(ग) स्थापत्यदृष्ट्या विश्वप्रसिद्धं किं मन्दिरम् ?

(घ) किं मन्दिरं भारतीयानां मनसि देशं प्रति गौरवभावमुत्पादयति ?

(ङ) कः राजस्थानस्य भ्रमणार्थम् आगन्तुम् इच्छति ?

२. **एकवाक्येन उत्तरत –**

(क) राजस्थानं केषां भूमिः अस्ति?

(ख) प्रतापगौरवकेन्द्रं कुत्र वर्तते?

(ग) विश्वस्य प्राचीनतमा पर्वतमाला का?

(घ) सूर्यनगरिरूपेण प्रसिद्धं किं नगरम् ?

(ङ) रमेशः कस्मै पत्रम् लिखितवान्?

३. **उचितं मेलनं कुरुत –**

| (क) | (ख) |
|---|---|
| (क) परशुराममहादेवः | १. पालीजनपदे |
| (ख) पटवाप्रासादानि | २. उदयपुरनगरे |
| (ग) राजस्थानस्य ताजमहलम् | ३. अरावलीपर्वतमाला |
| (घ) प्रतापगौरवकेन्द्रम् | ४. जैसमेरुनगरे |
| (ङ) प्राचीनतमा पर्वतमाला | ५. जसवन्तथडा |

**४. कोष्ठके दत्तपदैः रिक्तस्थानानि पूरयत -**

(राजस्थानं, स्वर्णनगरी, सममरुस्थलम् सूर्यनगरी, सप्त)

(क) जोधपुरनगरं .............................. रूपेण प्रसिद्धमस्ति ।

(ख) ................................... जैसलमेरुजनपदे स्थितमस्ति ।

(ग) जैसलमेरुनगरम् ........................ रूपेण ख्यातिं प्राप्तवान् ।

(घ) राजस्थाने ............................ ......... सम्भागाः सन्ति ।

(ङ) अरावलीपर्वतमाला ................. द्विभागयोः विभक्तं करोति ।

**५. रेखाङ्कितपदान् स्वीकृत्य प्रश्ननिर्माणं कुर्वन्तु -**

(क) प्रशासनिकदृष्ट्या राजस्थानं <u>त्रयस्त्रिंशत्</u> जनपदेषु विभक्तं वर्तते।

(ख) <u>जोधपुरनगरे</u> कायलानाकासारः वर्तते।

(ग) अरावलीपर्वतमाला <u>राजस्थाने</u> स्थितास्ति ।

(घ) <u>महाकविः माघः</u> राजस्थाने अभवत्।

(ङ) <u>प्रतापस्य</u> गौरवगानं प्रतापगौरवकेन्द्रं करोति।

**६. दत्तानां पदानां साहाय्येन स्वरचित-वाक्यानां लेखनं कुरुत -**

(क) बहिः ....................................................... ।

(ख) अभवत् ....................................................... ।

(ग) नमः ....................................................... ।

(घ) श्रेष्ठतमा ....................................................... ।

(ङ) सह ....................................................... ।

(च) रोचते ....................................................... ।

## योग्यता-विस्तारः

### (क) भाषा-विस्तारः

**विशेष्य-विशेषणम् –** येन शब्देन संज्ञापदस्य विशेषता प्रकटी भवति सः शब्दः विशेषणः कथ्यते। यस्य पदस्य विशेषता प्रकटितं भवति सः विशेष्यः भवति। विशेषणः विशेष्यपदानुगुणमेव भवति।

उक्तमपि वर्तते –

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य ।।

**यथा –**

| पुँल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| सुन्दरः बालकः | सुन्दरी बालिका | सुन्दरं वनम् |
| शौभनौ ग्रन्थौ | शोभने पत्रिके | शोभने पुस्तके |
| महान् ग्रन्थः | महती नाटिका | महत् नगरम् |
| लघुः कायः | लघ्वी कथा | लघु काव्यम् |
| श्रेष्ठतमः पुरूषः | श्रेष्ठतमा नारी | श्रेष्ठतमं पुष्पम् |

अन्यानि विशेषण-विशेष्यपदानि स्वीकृत्य पञ्चवाक्यानां रचना करणीया।

### (ख) कारकप्रकरणम्

कारकाणि षट् सन्ति– कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं च। कारकाणां बोधकारी विभक्तिः उच्यते।

१. **प्रातिपदिकः (शब्दः), लिङ्गम् (पुँल्लिङ्गम्, स्त्रीलिङ्गम्, नपुंसकलिङ्गम्) परिणाम (द्रोणम्, व्रीहिः) वचनं (एकवचनं, द्विवचनं, बहुवचनं) बोधयितुं प्रथमा विभक्तिः प्रयुज्यते।**

यथा – कृष्णः, श्रीः, ज्ञानम् , एकः, एकम्, एका, द्वे, त्रयः।

२. **कर्तायाः सर्वाधिकम् इप्सितं कर्मकारकम् उच्यते। कर्मकारके द्वितीया विभक्तिः प्रयुज्यते।**

यथा – माषेषु अश्वं बध्नाति।

३. **क्रियायाः सिद्ध्यर्थे सर्वाधिकसहायकसाधनः करणमुच्यते। करणकारके तृतीया विभक्तिः प्रयुज्यते।**

यथा – सः कलमेन लिखति ।पादाभ्यां चलति ।

४. **दानादि कर्मणा यम् उपक्रियते सः सम्प्रदानसंज्ञकं स्यात्। सम्प्रदाने चतुर्थीविभक्तिः प्रयुज्यते।**

यथा – विप्राय गां ददाति ।

५. **यस्मात् अपाय/विश्लेष/पृथक्करणं भवति सः अपादानसंज्ञकं स्याद् । अपादने पञ्चमीविभक्तिः प्रयुज्यते ।**

यथा – ग्रामाद् नगरं गच्छति । वृक्षात् पत्राणि पतन्ति ।

६. **स्व-स्वामीभावसम्बन्धं प्रदर्शयितुं षष्ठी विभक्तेः प्रयोगः भवति ।**

यथा – राज्ञः पुरुषः ।राजस्थानस्य गौरवम् ।बालिकानां क्रीडनकानि ।

७. **क्रियायाः आधारः अधिकरणसंज्ञकं स्यात् ।**

**अधिकरणे सप्तमीविभक्तिः प्रयुज्यते।**

यथा – कटे आस्ते ।स्थाल्यां पचति।

८. **अभितः परितः, समया, निकषा, हा, धिक्, प्रति योगे द्वितीयाविभक्तिः भवति।**

यथा – ग्रामम् अभितः उद्यानम् अस्ति। अस्माकं विद्यालयं परितः स्वच्छता भवेत्। ग्रामं निकषा तडागः अस्ति। सः नगरं प्रति गच्छति।

९. **विना, नाना, पृथक् शब्दानां योगे द्वितीया, तृतीया पञ्चमी च विभक्तयः भवन्ति।**

यथा– धनं, धनेन, धनात्, वा विना शून्यं जीवनम् ।रामं, रामेण, रामात्, वा पृथक् नाहं जीवामि। संस्कृतिं संस्कृत्या संस्कृत्याः वा विना राष्ट्रस्य गौरवं विनश्यति।

१०. **साकं, सार्धम् समम् सह योगेऽप्रधानकर्त्तरि, तृतीयाविभक्तिः भवति।**

यथा– सीता रामेण सह गच्छति वनम् ।भगतसिंहेन सह राजगुरुसुखदेवयोः बलिदानमभवत्।

११. **अङ्गविकारयोगे अङ्गवाचकशब्दे तृतीयाविभक्तिः भवति ।**

यथा – सः नेत्रेण काणः । बालकः पादेन खञ्जः।

१२. **नमः स्वस्ति, स्वाहा, स्वधा, अलं, वषड् योगे चतुर्थीविभक्तिः भवति ।**

यथा – गुरवे नमः । देशभक्तेभ्यः नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा ।पितृभ्यः स्वधा । अलं विवादाय ।इन्द्राय वषट् ।

१३. **क्रुध, द्रुह, ईर्ष्य, असूय शब्दानां योगे यं प्रति एषः प्रयुज्यते तत्र सम्प्रदानकारकं भवति।**

यथा – पिता पुत्राय क्रुध्यति ।रामः मोहनाय ईर्ष्यति ।सा लतायै असूयति ।

१४. **भी, त्रा रक्ष् धातुयोगे यस्मात्, भयादि भवति तत्र पञ्चमीविभक्तिः भवति ।**

यथा – चौरात् बिभेति । सिंहात् त्रायते । पापेभ्यः रक्षति ।

१५. **जन्, भू धातुयोगे उत्पत्तिस्थाने पञ्चमी विभक्तिः भवति।**

यथा – गोमयात् वृश्चिकाः प्रजायन्ते । गङ्गा हिमालयात् प्रभवति।

१६ **तरप् प्रत्यययोगे पञ्चमी विभक्तिः भवति ।**

यथा– निम्बवृक्षात् पिप्पलवृक्षः पवित्रतरः । ज्ञानात् ध्यानं श्रेष्ठतरम् ।

१७. **तमप् प्रत्यय योगे षष्ठी वा सप्तमी विभक्तिः भवति ।**

यथा– गवां गोषु वा कृष्णा बहुक्षीरा । कवीनां कविषु वा कालिदासः श्रेष्ठतमः ।